SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
Vol. 1, Issue-1, (Jan-Mar) 2025

# संस्कृतवाङ्मये रामकृष्णस्य साक्षाच्छिष्याणां योगदानम्

(saṃskṛtavāṅmaye rāmakṛṣṇasya sākṣācchiṣyāṇāṃ yogadānam)

**Dr. Bishnupada Pal**
Assistant Professor, Dept. of Sanskrit,
Visva-Bharati University, Santiniketan,
Bolpur, West Bengal, India.
E-mail ID: bishnupal2012@gmail.com

**Abstract:** Today, the Ramakrishna Mission and Math are the epitome of the Sanskrit language. Many institutions like Vedavidalaya, Vivekananda University and Vidyamandir are always working to promote and support Sanskrit. The knowledge of Sanskrit literature is essential for preserving Indian civilization and culture. Poetry such as the Ramayana, Mahabharata, and Puranas can be found in the beautiful tradition of Indian civilization and culture. The disciples of Ramakrishna Paramahansa made an invaluable contribution to Sanskrit literature. In order to build a well-organized environment for the general public, Sanskrit has been dedicated to the Sanskrit language. Namely, Swami Vivekananda wrote Shivastotra, Ambastotra and Ramakrishnastotra. Swami Brahmananda wrote Bhagavaccharanastotra. Swami Saradananda wrote Gadadharastotra, Saradapranamamantra, Vivekanandapranamamantra etc. Swami Abhedananda wrote Stotraratnakar, Sri Ramakrishnadhyana, Sri Ramakrishnavatarastotra, Sri Ramakrishnashtak, Sri Ramakrishnastotra, and Sreesaradevistotra. Swami Trigunatitananda wrote Sri Ramakrishnaavatarastotra and Swami Ramakrishnananda wrote Sri vivekanandapanchak. To this day, Swami Vivekananda regarded the practical Vedanta as very time-consuming. Ramakrishna has been serving Sanskrit mothers through reading and writing books in Sanskrit.

**Keywords:** Sanskrit, Ramakrishna, Sarada, Swami Vivekananda, Swami Brahmananda, Swami Saradananda, Swami Trigunatitananda, Swami Ramakrishnananda.

**सारांशः**— संस्कृतभाषा देवभाषा इति जनश्रुतिस्तु प्रसिद्धैव। तस्मात् गृहिणां गृहत्यागिनाञ्च संस्कृतभाषायाम् आसक्तिः सदैव विलसति। तस्मात् केचन गृहिणः सन्न्यासिनश्च आजीवनमेव संस्कृतमातुः सेवाकार्यै आत्मानम् असमर्पयन्। गृहिणश्च यथा— नागेशदीक्षितादयः विद्वांसः। सन्न्यासिनश्च यथा— शङ्कराचार्यादयः। एवञ्च आधुनिकयुगेऽपि काश्चन संस्थाश्च निरन्तरमेव संस्कृतमातुः प्रचाराय कार्यं कुर्वन्त्यः सन्ति। यथा— संस्कृतभारत्यादयः संस्थाः। पुनश्च अद्यापि संस्कृतमातुः प्रचाराय गुरुकुलं, प्रतिष्ठानं, संस्था, मठः इत्येते सर्वदा निःशुल्कतया छात्रान् पाठयित्वा संस्कृतमातृसेवकान् वर्धयन्ति। यथा— विवेकानन्दविश्वविद्यालयः, वेदविद्यालयश्च, विद्यामन्दिरं प्रभृतिकम्। पुनश्च केचन विश्वविद्यालयाः केवलं संस्कृतशास्त्रम् एव पाठयन्ति। एतेन

ज्ञायते यत् देवभाषायाः कीदृग् माहात्म्यं जगत्यस्मिन् विलसति। रामकृष्णसंघस्य सन्न्यासिनः देवभाषायां प्रायः सर्वे नितरां पटवः सन्ति। ते च महाराजाः विविधप्रतिष्ठानेषु संस्कृतभाषायाः पाठनकार्ये नियुक्ताः। केचन सन्ति महाराजाः, ये संस्कृभाषया ग्रन्थादिकम् अरचयन्। यथा— स्वामिविवेकानन्दादयः। केचन सन्ति महाराजाः, ये संस्कृतभाषया निबद्धस्य उपनिषदादिग्रन्थस्य इतरभाषया अनुवादं चक्रुः। यथा— स्वामिनो जुष्टानन्दादयः। एतेन सामान्यजनाः अपि उपनिषत्सु निहितगूढात्मतत्त्वं ज्ञातु पारयन्ति। पत्रेऽस्मिन् रामकृष्णस्य साक्षात् शिष्याणां संस्कृतवाङ्मये कीदृग् अवदानं विलसति इति तद्विषये पर्यालोच्यते।

**मुख्यशब्दाः**— संस्कृत, रामकृष्ण, सारदा, स्वामी विवेकानन्द, स्वामी ब्रह्मानन्द, स्वामी सारदानन्द, स्वामी त्रिगुणातीतानन्द, स्वामी रामकृष्णानन्द।

**रामकृष्णस्य साक्षात् शिष्याः —**

स्वयं भगवान् एव जगतः पुनरुद्धाय रामकृष्णरूपेण अवर्तीनः। परमहंसस्य रामकृष्णस्य साक्षात् षोडश शिष्याः आसन्।

ते च—

| | |
|---|---|
| स्वामी विवेकानन्दः | स्वामी ब्रह्मानन्दः |
| स्वामी योगानन्दः | स्वामी प्रेमानन्दः |
| स्वामी शिवानन्दः | स्वामी निरञ्जनानन्दः |
| स्वामी सारदानन्दः | स्वामी रामकृष्णानन्दः |
| स्वामी अभेदानन्दः | स्वामी अद्भूतानन्दः |
| स्वामी तुरीयानन्दः | स्वामी अद्वैतानन्दः |
| स्वामी त्रिगुणातीतानन्दः | स्वामी सुबोधानन्दः |
| स्वामी अखण्डानन्दः | स्वामी विज्ञानानन्दः |

"आत्मानं मोक्षार्थं जगद्धिताय च" इति नीतिवाक्यमवधार्य एते सन्न्यासिनः निरन्तरं कार्यं कुर्वन्तः आसन्। अद्वैतज्ञानिनः ब्रह्मसाक्षात्कारिणः एते सन्न्यासिनः सामान्यजनानां दुःखे व्यथिताः सन्तः दुःखनिवारणाय आजीवनं प्रयत्नं चक्रुः। ब्रह्म सत्यं जगन्मिथ्या इति ज्ञानं तु एतेषां रामकृष्णाज्जातः। पार्थिववस्तुषु मोह एव जगतः दुःखकारणम् इति एतादृशज्ञानस्य प्राप्तौ हेतुः अवतारवरिष्ठः श्रीश्रीरामकृष्णपरमहंसः। पुनश्च शुद्धजीवनयापनेन एव भगवतः साक्षात्कारो भवति। तस्मात् सदा सच्चिन्तनं, भगवद्भक्तिः, सत्कर्म, एकात्मभावः, जपः, ध्यानं, शुद्धमन्त्रोच्चारणम् इत्येते भगवत्साक्षात्कारे हेतुभूताः। ब्रह्मविद्याप्रतिपादकग्रन्थाः देवभाषया विरचिताः। तस्मात् रामकृष्णपरम्परायाम् अन्तर्भूताः महाराजाः सर्वे प्रायः संस्कृतभाषायां कृतभूरिपरिश्रमाः। ते च रामकृष्णस्तोत्रं, उपनिषद्भाष्यं, प्रणाममन्त्रं, ध्यानमन्त्रं सुरभारतीभाषया

अलिखन्। सम्प्रति रामकृष्णस्य साक्षात् केषाञ्चित् शिष्याणां सुरभारतीभाषायाम् अवदानम् अतुलनीयम्। सम्प्रति अधः तेषां महाभागानां सुरभारतीभाषायाम् अवदानविषये समासेन यथामति आलोच्यते।

**स्वामी विवेकानन्दः —**

१८६३ ईसवीयसंवत्सरस्य जनवरीमासस्य द्वादशदिनाङ्के, १२६९ वङ्गाब्दस्य पौषसङ्क्रान्तिदिने कृष्णसप्तमीतिथौ उत्तरकोलकाताया दत्तपरिवारे जनिमलभत। तस्य पितरावास्तां विश्वनाथदत्तो भुवनेश्वरीदेवी च। स श्रीरामकृष्णदेवाद् दीक्षितः सन् १८८६ संवत्सरे अगष्टमासस्य षोडशदिनाङ्के गुरोः महाप्रयाणात् परं सनातनधर्मस्य प्रचाराय मतिं चकार। ततःपरं स्वामी विवेकानन्दः इति नाम्ना परिचितोऽयम्। ततःपरं महाभाष्यं, योगशास्त्रं, सांख्यशास्त्रं, ज्योतिश्शास्त्रम्, अष्टाध्यायीम्, वेदान्तशास्त्रं स्वामी विवेकानन्दः पपाठ। न केवलं भारते अपि तु समग्रजगति सनातनधर्मस्य विशेषेण वेदान्तस्य प्रचारम् अकरोत्। कार्येणानेन विश्वगुरुः इति ख्यातिः लब्धा। अयञ्च मनीषी १८९३ ईसवीयसंवत्सरे सितम्बरमासस्य ११ दिनाङ्के स अमेरिकायाः शिकागो-धर्ममहासभायां भाषितवान्। ततः विदेशभ्रमणात् परं भारतं प्रत्यागत्य पुण्यतीर्थे वेलुडे १८९१ ईसवीयसंवत्सरे मे-मासस्य प्रथमदिनाङ्के रामकृष्णमिशनस्य स्थापनां चकार।

**कृतिः** —

स्वामी विवेकानन्दः विश्वधर्मसम्मेलने हिन्दुधर्मस्य पुनः प्रतिष्ठानं चकार। अधुनापि भारतवर्षः इति नामकः कश्चित् देशः जीवति इति वैदेशिकाः विवेकानन्दमुखात् अजानन्। स्वामी विवेकानन्दः कस्यचित् गुरोः सकाशात् अद्वैतवेदान्तं न पपाठ। परन्तु अत्यन्तं सरलतया दुर्बोधम् अद्वैतवेदान्तशास्त्रं जनान् बोधयामास। अद्वैतवेदान्तशास्त्रं वक्ति— अहं ब्रह्मास्मि, तत्त्वमसि। इदमेव स्वामिना प्रोक्तम्—

" बहु रूपे सम्मुखे तोमार, छाडि कोथा खुँजिछो ईश्वर।
जीवे प्रेम करे येइ जन सेइ जन सेविछे ईश्वर"।[1]इति

स्वामी विवेकानन्दः संस्कृतभाषया बहूनि स्तोत्राणि रचयामास। शिवभक्तः विवेकानन्दः शिवस्य, जगदम्बायाः, जगदाधारभूतस्य गुरोः रामकृष्णपरमहंसस्य सुरभारतीभाषया स्तुतिं लिलेख। प्रायः सप्त स्तोत्राणि विद्यन्ते। तानि च—

शिवस्तोत्रम् अम्बास्तोत्रम् श्रीरामकृष्णस्तोत्रम् श्रीरामकृष्णस्तोत्रम्-१
श्रीरामकृष्णस्तोत्रम् - २ श्रीरामकृष्णस्तोत्रम्-३ श्रीरामकृष्णप्रशस्तिः

**शिवस्तोत्रम् —**

अस्मिन् शिवस्तोत्रे शिवस्य स्तुतिः विधीयते। स्तोत्रेऽस्मिन् षड् श्लोकाः सन्ति। भक्त्यैव भगवतः लाभो भवति। तस्मात् विभुत्वव्याजेन यः कोऽपि सकलमपि परस्मै समर्प्य परप्रेम्णा

समर्पणभावनया शिखराधिरूढे दैवभावे महादेवत्वं प्राप्नोतीति । पुनश्च कर्मफलेन जन्मचक्रे पतिताः वयम्। तस्मात् जगत्यस्मिन् किमपि नास्ति स्वकीयं परकीयञ्च। तस्मात् सर्वं परित्यज्य निर्विकल्पसमाधिना चित्तस्थमीश्वरं प्राप्तुमिच्छति। तथाहि स्वामी विवेकानन्दः प्राह— "हृति प्रणयति विश्वं व्याजमात्रं विभुत्वम्"[2] ॥ शिवस्तोत्रे मन्त्रे कथं कदा च ईश्वरप्राप्तिर्भवति इति प्रतिपादितम्। स च कथयति— विगते अज्ञाने ज्ञानस्य उदये सति हृदये राजहंस आत्मा एव आत्मानं रक्षतु। उद्धरेदात्मनात्मानम् इति श्रुतिवचनं प्रकाशयति। तथाहि प्रोक्तम्—

"गलिततिमिरमालः शुभ्रतेजः प्रकाशो, धवलकमलशोभो ज्ञानपुञ्जाट्टहासः।
यमिजनहृदिगम्यो निष्फलो ध्यायमानः, प्रणतमवतु मां सः मानसो राजहंसः॥५॥"[3] इति

स्तोत्रैः सकलदोषप्रशमनोपायं नीलकण्ठं सदाशिवं प्रसादितवान्। जगति दुःखमवश्यमेव विद्यते। दःखस्यास्य नाशाय शिव एव शरणम्।

**अम्बास्तोत्रम् —**

अम्बास्तोत्रे सप्त श्लोकाः सन्ति। सप्तश्लोकीरूपेयं स्तुतिः विश्वसर्जने अपरप्रयत्नरूपां मातरं परिचेतुं प्रयत्नपरो लक्ष्यते, अन्ते च सफले अफले वा तामेकामेव गतिं मुक्तिं भाग्यविधात्रीमिति मनुते। तथाहि प्रोक्तम्—

"का त्वं शुभे शिवकरे सुखदुःखहस्ते, आघुर्णितं भवजलं प्रबलोर्मिभङ्गे।
शान्तिं विधातुमिह किं बहुधा विभग्नाम्, मातः प्रयत्नपरमासि सदैव विश्वे॥[4]" इति।

कदाचित् इयं माता धात्री, शुभाशुभफलप्रदात्री इच्छानुरूपं संसारं पालयित्री अपरा काचित् विधात्री वर्तते। विवादे विषादे प्रमादे प्रवासे, रिपौ वा मित्रौ,अहौ हारे वा यस्याः देव्याः अमृतदृष्टिः संसारं रक्षति, सा एव शरणं कवेः।स्वामिजी विनम्रतया देव्या महिमानं वर्णयति। तथाहि स्वामीजी स्तोत्रे प्राह—

"मित्रे रिपौ त्वविषमं तव पद्मनेत्रम्, स्वस्थेऽसुखे त्वविथस्तव हस्तपातः।
छाया मृतेस्तव दया त्वमृतं च मातर्मुञ्चन्तु मां न परमे शुभदृष्टये॥"[5] इति।

जगत्यस्मिन् देवी सर्वात्मना विराजते। अर्थात् पशुजन्त्वादितत्तदात्मनैव देवी तिष्ठति। अस्मिन् जगति माता एवं सर्वशुभाशुभफलदात्री, मङ्गलमयी, शत्रुनाशकारिणी वर्तते। अतः वयं मर्त्याः सर्वं परित्यज्य मातुः शरणेव गच्छामः।

**रामकृष्णस्तोत्रम् —**

जगद्गुरुः रामकृष्णः स्वस्य देहत्यागावसरे स्वामिने विवेकानन्दाय सर्वं सामर्थ्यं दत्तवान्। तेन सामर्थ्येन आविश्वे विश्वगुरुः इति ख्यातिः लब्धा। स्वामी विवेकानन्दः लोकातीतस्य जगद्गुरोः रामकृष्णस्य वन्दनायै स्तोत्राणि अरचयत्। अनन्यभक्तिभावनया भावितोऽयं साधकः सर्वतोभावेन धर्मसंस्थापकरूपेण, अवतारपुरुषरूपेण प्रतिष्ठापयति गुरुवरेण्यम्। तथाहि प्रणाममन्त्रमाह—

"स्थापकाय च धर्मस्य सर्वधर्मस्वरूपिणे।
अवतारवरिष्ठाय रामकृष्णाय ते नमः॥[6] इति"

श्रीरामकृष्णस्तोत्रे चतुर्भिः श्लोकैः रामस्य कृष्णस्य चोत्तरावतारूपेण नरदेवरूपेण च प्रतिपादयति श्रीरामकृष्णदेवम्। पतितानां जनानां शरणं रामकृष्णः। तथाहि प्रोक्तम् स्वामिना- "नरदेव देव जय जय नरदेव"[7] इति।

द्वितीये श्रीरामकृष्णस्तोत्रे स्वामिवर्यः विवेकानन्दः अगतिकगतिकं गुरुपादपद्मं शरणं ब्रजति। आर्तिजनानां खेदं नाशयति, दिवा रात्रौ च अस्मासु करुणां वर्षयति। एतदेव स्तोत्रे कथयति— "यस्मादहं त्वशरणो जगदेकगम्य तस्मात्त्वमेव शरणं मम दीनबन्धो।"[8] इति।

एकश्लोकात्मके श्रीरामकृष्णस्तोत्रे वेदयज्ञपुराणेषु स्तुतगीतः परमपुरुषः एव अयं रामकृष्णपरमहंसः। स च जगद्गुरुः जगदुद्धाराय अवतारवरिष्ठरूपेण मर्त्यलोके अवततार। तथाहि स्तोत्रे गीतम्—

"सामाख्याद्यैर्गीतिसुमधुरैर्मेघगम्भीरघोषैर्यज्ञध्वान्तध्वनित गगनैर्ब्राह्मणनैर्ज्ञाचवेदैः।
वेदान्ताख्यैः सुविहितमखोद्भिन्न-मोहान्धकारैः स्तुतो गीतो य इह सततं तं भजे रामकृष्णम्॥"[9] इति।

गुरोर्गरिमाणं यथा वदतु न कदापि शिष्यः तृप्यति। अतः वारं वारं तस्य जगद्गुरोः स्तवनं विधाय अन्ते श्लोकत्रयेण श्रीरामकृष्णप्रशस्तिस्तोत्रम् अरचयत्। देहात्मवादिनो मूढा आत्मनः क्षीणान्, दीनान्, मन्वन्ते। परन्तु रामकृष्णभक्ताः आस्तिकास्तद्विपरीतम् आत्मनो वीरान् गतभयान् मन्वन्ते। संसारत्यागिनः कौपिनवन्तः स्वार्थसिद्धिं विहाय परमपीयूषं पीत्वा श्रीगुरुचरणं ध्यायन्ति। तथाहि श्रीरामकृष्णप्रशस्तौ विवेकानन्देन गीतम्—

"क्षीणाः स्म दीनाः सकरुणा जल्पन्ति मूढा जनाः,
नास्तिक्यन्त्विदन्तु अहह देहात्मवादातुराः।
प्राताः स्म वीरा गतभया अभयं प्रतिष्ठां
यदा आस्तिक्यन्त्विदन्तु चिनुमो रामकृष्णदासा वयम्॥"[10] इति

**स्वामी ब्रह्मानन्दः —**

स्वामी ब्रह्मानन्दः श्रीश्रीरामकृष्णस्य साक्षात् शिष्येषु अन्यतमः कश्चित्। तस्य बाल्यनाम राखालचन्द्रघोषः। वसिरहाट इत्यस्य शिकराकुलीननामके ग्रामे १८६३ खीष्टाब्दस्य जानुयारिमासस्य एकविंशतितमे दिनाङ्के जनिमलभत। तस्य पितुः नाम आनन्दमोहनघोषः। द्वादशवर्षीयः राखालः पाठशालां समाप्य उच्चशिक्षायै कलिकातां समायातः। अवशेषे १८८१ खीष्टाब्दे मनोमोहनमित्रस्य भगिन्या सह राखालस्य परिणयो जातः। एकस्मिन् दिने श्वशुरालये आगतं राखालं दक्षिणेश्वरम् आनीतवान् मनोमोहनमित्रः। ततः विवाहबन्धनं बिभेद्य रामकृष्णस्य शरणागतमभवत् स्वामी ब्रह्मानन्दः। ततःपरं रामकृष्णमठस्य प्रथमाध्यक्षत्वेन सेवां चकार। पुनश्च राजा महाराज इति उपाधिना विश्वे ख्यातिम् अलभत।

**कृतिः —**

स्वामी ब्रह्मानन्दः पठनपाठने अत्यन्तं दक्षः कुशलश्च। स च आध्यात्मिकग्रन्थानाम् अध्ययनं चकार। उपनिषत्ग्रन्थम्, गीताशास्त्रम्, पुराणम् इत्यादीनाम् तत्त्ववेत्ता आसीत्। संस्कृतवाङ्मये श्रीभगवच्छरणस्तोत्रम् अलिखत्। तस्य विवरणम् अधः प्रस्तूयते।

**श्रीभगवच्छरणस्तोत्रम् —**

अत्र स्तोत्रे एकविंशतिः मन्त्राः सन्ति। तस्मात्त्वमद्य शरणं मम दीनबन्धो इति पङ्क्तेः पुनः पुनः आवर्तनं भवति। भगवतः स्तुतिः विधीयते। तस्य भगवतः महिमानं वर्णयति स्तोत्रकारः। भगवान् सच्चिदानन्दरूपः, भक्तानुग्रहकारी, मायानिर्मितविश्वः, महेशः। तं स्तौमि। जगति अस्मिन् यत् किमपि भवति तत्तु अस्मदधीनं नैव विद्यते। यथा— रोगा हरन्ति सुस्वास्थ्यं शरीरम्। कामादयः प्रतिदिनं चित्तं प्रदहन्ति। मृत्युः सदा नृत्यति। तथाहि गीतम्—

"रोगा हरन्ति सततं बाला प्रबलाः शरीरम्, कामादयोऽप्यनुदिनं प्रदहन्ति चित्तम्।
मृत्युश्च नृत्यति सदा कलयन् दिनानि, तस्मात्त्वमद्य शरणं मम दीनबन्धो॥[11]" इति।

देहः विनश्यति, सदा परिणामशीलः, विषयानुरागिनां चित्तं खिद्यति, बुद्धिः सदा कुकर्मणि अनुरक्ता भवति, आयुः विनश्यति, यौवनं गच्छता कालेन विनश्यति। अर्थात् कर्णः, चक्षुः, दन्तः जिह्वा, त्वग् यद्यपि सक्रियतया यौवने तिष्ठति चेदपि गच्छता कालेन सर्वं नश्यति। माता, पिता, बन्धुः, भार्या, पुत्रः, इत्येते सर्वाः गच्छता कालेन नश्यन्ति। पुनश्च कालपाशात् राजापि कदाचित् याचकः भवति।तस्मात् किमपि वस्तु नित्यतया न तिष्ठति। तस्मात् निर्लिप्ततया दीनबन्धो शरणं कार्यमिति ब्रह्मानन्दस्य आशयः।

**स्वामी सारदानन्द —**

स्वामी सारदानन्दः रामकृष्णस्य साक्षाच्छिष्यः आसीत्। कलिकातायाः आमहेर्ष्टवीथ्याम् एकस्मिन् नैष्ठिकपरिवारे १८६५ ईसवीयसंवत्सरे डिसेम्बरमासस्य २३ दिनाङ्के जनिमलभत। स्वामिसारदानन्दस्य बाल्यनाम शरच्चन्द्रचक्रवर्ती। निर्धनानां दुःखार्तानां रोगिणां च दुःखेन नितरां सन्तप्तः स बाल्यादेव तेषां सेवाम् अकरोत्। क्रमशः स आध्यात्मिकं मार्गम् प्राविशत्। वारानगरमठे युवसन्न्यासिभिः सह शरच्चन्द्रः साधनां प्रारब्धवान्। यदा रामकृष्णमिणन प्रारब्धस्तदा विवेकानन्दस्तं तस्य मठस्य सम्पादकरूपेण नियुक्तवान्।

**कृतिः —**

स्वामी सारदानन्दः पञ्च स्तोत्राणि अलिखत्। ते च— १. श्रीगदाधरस्तोत्रम् २. सारदाप्रणाममन्त्रः ३. विवेकानन्दप्रणाममन्त्रः ४. सपार्षदश्रीरामकृष्णस्तोत्रम् ५. श्रीविवेकानन्दगीतिस्तोत्रम्।

**श्रीगदाधरस्तोत्रम् —**

अस्मिन् स्तोत्रे अष्ट मन्त्राः सन्ति। "प्रणमामि गदाधरब्रह्मपरम्" इति पादः प्रत्येकं श्लोकस्य अन्ते आयाति। रामकृष्णस्य बाल्यनाम गदाधरः आसीत्। तस्य परमगुरोः रामकृष्णस्य स्तुतिः स्तोत्रेणानेन विधीयते। ब्रह्मज्ञानी आसीत् रामकृष्णः। स्तोत्रेणानेन रामकृष्णस्य गुणवर्णना एव विधीयते। यथा— प्रज्ञानघनः स निश्चलो निष्पापो नीरोगो नित्यानन्दस्वरूपः, निर्गुणः, सकलयुक्तिखण्डनेन ज्ञानलोकप्रसारकः, दुष्टानां परित्राणाय अघमर्षणाय च सदा करुणाघनस्वरूपः, शिवकेशववासवसमानः अवतारवरिष्ठः। तथाहि गीतम्—

"करुणाघनकर्मकठोरपणं गुणहीनपापमशेषगुणम्।
युगचक्रविवर्तकतर्कहरं प्रणमामि गदाधरब्रह्मपरम्॥"[12] इति।

**सारदाविवेकानन्दयोः प्रणाममन्त्रः —**

स्वामी सारदानन्दः जगज्जनन्याः सारदामातुः विवेकानन्दश्च अत्यन्तं प्रियः आसीत्। वागवाजारे मातुः परिसेवाय अयं नियुक्तः आसीत्। पुनश्च रामकृष्णमठस्य प्रथमाध्यक्षस्य स्वामिनो ब्रह्मानन्दस्य देहत्यागानन्तरं सन्न्यासिनः सारदानन्दं महाराजमेव अध्यक्षत्वेन प्रार्थितवन्तः। परन्तु स तदस्वीकृत्य विवेकानन्देन पूर्वं नियुक्ते सम्पादकपदे एव मठं सेवितवान्। सारदानन्दः विवेकानन्दमहापादानां प्रणाममन्त्रम् अलिखत्। तथाहि श्लोकः—

"परतत्त्वे सदा लीनो रामकृष्णसमाज्ञया।
यो धर्मस्थापनारतो वीरेशं तं नमाम्यहम्॥"[13] इति।

जगज्जनन्याः सारदामातुः प्रणाममन्त्रं लिलेख। तथाहि श्लोकः—

"यथाग्नेर्दाहिकाशक्ती रामकृष्णे स्थिता हि या।
सर्वविद्यास्वरूपां तां सारदां प्रणमाम्यहम्॥"[14] इति

**सपार्षदश्रीरामकृष्णस्तोत्रम् —**

अत्र पञ्च श्लोकाः आसन्। अत्र सारदानन्दः पञ्चसु श्लोकेषु त्रिभिः श्लोकैः श्रीरामकृष्ण-सारदादेवी-विवेकानन्दानां गुणकीर्त्तनं कृत्वा ब्रह्मानन्दं योगानन्दं प्रेमानन्दञ्च प्रणमति। स रामकृष्णम् आचार्याणां महाचार्यं मनुते, सारदादेवीं शक्तिस्वरूपिणीं मनुते, यथा अग्नेः दाहिका शक्तिः, तथैव तां स्वीकरोति। गुर्वाज्ञया धर्मसंस्थापने वीरेश्वरं मनुते स्वामीवर्यम्। तेषामेव गुणसंकीर्तनं विद्यते स्तोत्रेऽस्मिन्। तथाहि गीतम्—

"योगानन्दः प्रेमानन्दश्चान्ये वै ये च पार्षदाः।
रामकृष्णगतप्राणाः सर्वांस्तान् प्रणमाम्यहम्॥"[15] इति

**श्रीविवेकानन्दगीतिस्तोत्रम् —**

अत्र श्लोकत्रयम् अस्ति। शिवानुकम्पया जातं स्वामिनं विवेकानन्दं क्वचिन्मूर्त्तरूपम्, क्वचिद् उज्ज्वलसूर्यम्, वेदप्रवीणम्, कामिनीकाञ्चनादिबन्धरहितं मनुते। अर्थात् सारदानन्दमहाराजः विवेकानन्दस्य स्तुतिं चकार। तथाहि गीतम्—

"मूर्तमहेश्वरमुज्ज्वलभास्करमिष्टममरनरवन्द्यम्।
वन्दे वेदतनुमुझितगर्हितकाञ्चनकामिनीबन्धम्॥"[16] इति।

कोटिसूर्यप्रभां दीप्तिसिंहस्य दीप्तिम्, धर्मप्रचाराय कृतं हुङ्कारवरम् आसंसारं तस्य शिवस्वरूपस्य ताण्डवनृत्यं कलयति। तथाहि श्लोकः—

"कोटिभानुकरदीप्तिसिंहमहोकटितकौपीनवन्तम्।
अभीरभीहुङ्कारनादितदिङ्मुखप्रचण्डताण्डवनृत्यम्॥"[17] इति।

एवं स्वामी सारदानन्दः स्वामिनो विवेकानन्दस्य गुणकीर्तनम्, श्रीरामकृष्णस्य गुणसंकीर्तनम्, सारदादेव्याः गुणसंकीर्तनम् चकार सुरभारतीभाषया। तेन स्वामी सारदानन्दः रामकृष्णमठस्य सेवां कुर्वन् सुरभारतीं भाषाम् असेवत।

**स्वामी अभेदानन्दः —**

स्वामी अभेदानन्दः साक्षाच्छिष्यः आसीत् रामकृष्णस्य। तस्य बाल्यकाले नाम आसीत् कालीप्रसादः। स्वामी अभेदानन्दः १८६६ ईसवीयशतकस्य अक्टोवरमासस्य प्रथमे दिनाङ्के कलिकातायां जनिमलभत। यौवनस्य प्रारम्भावसरे खीष्टधर्मं प्रति आकृष्ट आसीत्। परं ब्राह्मणानां भाषणेन मुग्धः सन् हिन्दुधर्मे अनुरक्तः अभूत्। ततःपरं भारतीयदर्शनं समाश्रित्य बहून् ग्रन्थान् अलिखत्।

**कृतिः —**

तस्य भाषणं ग्रन्थाश्च अतीव प्रसिद्धाः आसन्। श्रीरामकृष्णवेदान्तमठेन १९६८ ईशवीयसंवत्सरे तस्य जन्मवार्षिक्यसंवत्सरे सम्पूर्णं कृतित्वं प्रकाशितम्। ते च ग्रन्थाः—

१.Gospel of Ramakrishna Reincarnation.

२.How to be a Yogi.

३.India And Her People.

४.आत्मविकाश

५.वेदान्तवाणी।

६.हिन्दुधर्मे नार्याः स्थानम्।

७.मनसः विचित्रं रूपम्।

८.स्तोत्ररत्नाकरम्

**स्तोत्ररत्नाकरम् —**

अस्मिन् ग्रन्थे मुख्यतः स्वामिना अभेदानन्देन विरचितानि श्रीरामकृष्णस्तोत्राणि, श्रीसारदास्तोत्राणि च विलसन्ति। ततःपरं श्रीरामकृष्णस्य ध्यान-प्रणाम-स्तोत्र-स्तवराज-अष्टक-स्तोतामृत-अवतारस्तोत्राणि प्रणीतवान्। ततः श्रीसारदादेव्याः ध्यान-प्रणाम-स्तोत्राणि कल्पयति।

**श्रीरामकृष्णध्यानम् —**

जगद्गुरोः रामकृष्णस्य ध्यानमन्त्रं लिलेख। स्तोत्रे अस्मिन् मन्त्रत्रयं राराजते। अत्र प्रथमे स्तोत्रे श्लोकत्रयेण गुरुदेवस्य लोकोत्तरचरितं स्तुतं वर्तते। नित्यानन्दस्वरूपगुरुं हृदयकमलमध्ये कल्पयति भक्तः। ततः गुरोः गुणवर्णना क्रियते। यथा-सदसदखिलभेदातीतः, एकः, प्रकृतिविकृतिशून्यः, नित्यः, आनन्दमूर्तिमान्, त्रिगुणातीतः, सर्वाधिवासः, ईशः, अतिसूक्ष्मः, निरूपाधिकः, विमलपरमहंसः इत्यादयः। तथाहि गीतम्—

"हृदयकमलमध्ये राजितं निर्विकल्पं सदसदखिलभेदातीतमेकस्वरूपम्।
प्रकृतिविकृतिशून्यं नित्यानन्दमूर्तिं विमलपरमहंसं रामकृष्णं भजामः॥"[18] इति।

**श्रीरामकृष्णावतारस्तोत्रम् —**

अस्मिन् स्तोत्रे श्रीरामकृष्णध्यानस्य श्लोकाः पूर्वपीठिकात्वेन समाश्रिताः। अत्र विंशतिः श्लोकाः सन्ति। श्रीजयदेवस्य शैल्या मत्स्यकूर्मादिदशावतारान् कल्पयति। परन्तु कृष्णमवताररूपेण गृहीत्वा म्लेच्छावतारं त्यजति। एवञ्च श्रीरामकृष्णः जगति विद्यमानवस्त्वात्मना एव वर्तते। अर्थात् सर्वत्र एकात्मभावः प्रतिपादितः। तथाहि गीतम्—

"अतुलविपुलदेहे चिन्मये कूर्मरूपे वहसि सकलमेतद्विश्वाधारशक्त्या।
तव खलु महिमानं कोऽल्पधीर्वर्णयेत् त्वाम् विमलपरमहंसं रामकृष्णं भजामः"।[19] इति।

**श्रीरामकृष्णस्तवराजः —**

अत्र पञ्चदश श्लोकाः सन्ति। स्तोत्रकारः "भुवि रामकृष्णः" इति पदं वारं वारं पुनरावर्तते। अत्र रामकृष्णस्य लीलाचरितं सरसतया वर्णयति। "ॐ नमो भगवते रामकृष्णाय" इति मन्त्रं परिकल्प्य तदनुरूपमस्य स्तवराजस्य रचना विहिता, यत्र एकेन एकेन अक्षरेण एकैकशः श्लोकः रचितः। गुरुः सर्वज्ञः वेदासाधनायोगध्यानधारणाभ्यः परं विद्यते। गुरुकृपां विना तस्यावगमनं नैव भवति इति मतिः। तथाहि गीतम्—

"ओङ्कारवेद्यः पुरुषः पुराणो बुद्धेश्च साक्षी निखिलस्य जन्तोः।
यो वेत्ति सर्वं न च यस्य वेत्ता परात्मरूपो भुवि रामकृष्णाय॥"[20] इति।

**श्रीरामकृष्णाष्टकम् —**

उपजातिवृत्तेन अत्र अष्टौ श्लोकाः लिखिताः। "हे रामकृष्ण त्वयि भक्तिहीने कृपाकटाक्षं कुरु देव नित्यम्" इति अन्तिमं पदं पुनः पुनः आवर्तते। अत्रापि श्रीरामकृष्णस्य गुणवर्णना क्रियते। यथा हि— अव्यक्तः, आदिपुरुषः, विश्वस्य स्रष्टा, जगतः कर्ता, मायां समाश्रित्य लीलां विदधाति। तथाहि गीतम्— "त्वं पाहि विश्वं सृजति त्वमेव त्वमादिदेवो विनिंहसि सर्वम्"[21] इति।

**श्रीरामकृष्णस्तोत्रम् —**

सोत्रे अस्मिन् ४७ पङ्क्तयः सन्ति। सर्वम् अनुष्टुभा लिखितम्। तत्र एकम् उपजातिवृत्तं विलसति। परन्तु श्लोकसंख्या त्रुटिता लक्ष्यते। कुत्रचित् ४ पङ्क्तयः, कुत्रचित् ३ पङ्क्तयः सन्ति। तस्मात् पङ्क्तिसंख्या समुल्लिखिता। अत्र स्तोत्रे लोककल्याणभावना वर्ण्यते। तथाहि गीतम्—

"सद्ब्राह्मणकुले जातो दिव्यदेहं समाश्रितः,
बाल्ये यो दिव्यभावेन वयस्यैः सह मोदयन्।
विरक्तो यौवने तीव्रं मायापाशविवर्जितः
नित्यमुक्तस्वभावोऽपि लोकानुग्रहकामतः"[22] इति।

नमोऽस्तु रामकृष्णाय तस्मै श्रीगुरवे नमः, रामकृष्णं नमाम्यहम्, रामकृष्ण नमोऽस्तु ते इत्यादिपदं पुनः पुनः आवर्तते। तच्च आध्यात्मिकतां दर्शयति। अत्रापि रामकृष्णस्य स्तुतिः विद्यते। रामकृष्णस्य विष्णुत्वेन महेश्वरत्वेन शक्तिस्वरूपेण कल्पना विधीयते। मुक्तिदायकः, सर्वभावस्वरूपी, सच्चिदानन्दः, प्रज्ञानघनः, निर्गुणः रामकृष्णः। तथाहि लिखितम्—

"सर्वाय सर्वपापाय सर्वभावस्वरूपिणे सर्वभावविहीनाय रामकृष्णाय नमः" इति।

**श्रीश्रीरामकृष्णगुणामृतम् —**

अत्र नव श्लोकाः सन्ति। अत्र अनुष्टुप् छन्दः वर्तते। रामकृष्णस्य गुणाः वर्णिताः सन्ति। अत्र स्वामिवर्यो गुरोः अशेषगुणान् पुनः पर्वतीकृत्य प्रकटयति। तथाहि गीतम्—

"कदा योगी कदा भोगी कदा वा ज्ञानवित्तमः।
कदा भक्तः कदा शाक्तो वैष्णवश्चापि वा कदा॥" इति।

**श्रीसारदादेवीध्यानम् —**

स्वामी अभेदानन्दः श्रीसारदादेवीध्यानश्लोकम् अलिखत्। अत्र पञ्च श्लोकाः सन्ति। तथाहि गीतम्—

"ध्यायेच्चित्तसरोजस्थां सुखासीनां कृपामयीम्।
प्रसन्नवदनां देवीं द्विभुजां स्थिरलोचनाम्॥"[23] इति।

ततःपरं मातुः स्वरूपवर्णनं विहतम्। ततःपरं मातुः गुणवर्णना च विधीयते। एतादृशं मातरं मनसि निधाय भक्ताः मातुः ध्यानं कर्तुं पारयन्ति।

**श्रीसारदादेवीस्तोत्रम् —**

अत्र एकादश श्लोकाः सन्ति। "प्रणमामि परां जननीं जगताम्" इति पङ्क्तेः पुनरावृत्तिः जायते। अस्मिने स्तोत्रे मातुः गुणवर्णनं विधीयते। माता साक्षात् ब्रह्मस्वरूपिणी, भयहीना, अभयदात्रिणी, शरणागतानां रक्षाकारिणी, त्रिगुणातीता, भावसागरस्य पारयित्री, ज्ञानदायिनी, रामकृष्णप्राणगता, भक्तिविज्ञानदात्री, तमोनाशिनी, दयस्वरूपा, पापात् रक्षाकारिणी, शत्रुनाशिनी इत्येते गुणाः वर्णिताः। आदौ गुणसंकीर्तनं विधाय एतत्सदृशं मातरं प्रणमामि । तथाहि गीतम्—

"प्रकृतिं परमामभयां वरदां नररुपधरां जनतापहराम्।
शरणागतसेवकतोषकरीं प्रणमामि परां जननीं जगताम्॥"[24] इति

**स्वामी त्रिगुणातीतानन्दः —**

रामकृष्णस्य परमहंसस्य साक्षात् शिष्येषु अन्यतमः कश्चित्। स्वामी त्रिगुणातीतनन्दः इति सन्न्यासीनाम। तस्य बाल्यकाले श्रीसारदाप्रसन्नः मित्रः इति नाम आसीत्। श्रीदुर्गादेव्याः कृपया पुत्रस्यास्य जन्म अभवत्। तस्मात् एतादृशं नामकरणम्। १८६५ खीष्टाव्दस्य जानुयारिमासस्य त्रिंशत्तमे दिनाङ्के दक्षिण-चव्विशपरगनाजिलायाः पाइकहाटीरनाओरा इति ग्रामे जनिमलभत। तस्य पितुः नाम शिवकृष्णमित्रः। बाल्यकालात् पूजापाठे आसक्तिः आसीत्।

**कृतिः —**

स्वामी त्रिगुणातीतानन्दः महाराजः अत्यन्तं बुद्धिमान् आसीत्। बाल्यकाले एव १०८ स्तोत्राणि भगवत्प्रणाममन्त्रं कण्ठस्थीकृतवान्। पुनश्च भगवद्गीताम्, चण्डीपाठम्, उपनिषत्ग्रन्थं स्वरसमेतं पठितुं शक्नोति। निम्नविद्यालयस्य पाठं समाप्य उच्चशिक्षायै मेट्रोपलिटान्-इनस्टिउशान इति संस्थां प्रति आगतः। ततःपरम् उच्चशिक्षां समाप्तिवान्। ततःपरं मास्टारमशाइ सारदां दक्षिणेश्वरं प्रति आनीतवान्। संस्कृतभाषया श्रीरामकृष्णस्य स्तुत्यर्थं श्रीरामकृष्णावतारस्तोत्रम् अलिखत्।

**श्रीरामकृष्णावतारस्तोत्रम् —**

स्तवनाञ्जलिनामके पुस्तके इदं स्तोत्रं श्रीरामकृष्णावतारस्तोत्रम् इति नाम्ना ख्यातिः प्राप्ता। अत्र चत्वारः श्लोकाः सन्ति। अनेन स्तोत्रेण श्रीरामकृष्णस्य स्तुतिः विधीयते। अत्रापि जगद्गुरोः श्रीश्रीरामकृष्णस्य गुणवर्णनमाध्यमेन स्तोत्रम् आरब्धम्। पुनश्च रामकृष्णस्य गुणसंकीर्तनेन

स्तोत्रमिदं समाप्तं विद्यते। यथा- रामकृष्णः विषयविरागी, सुखनिवहः, यस्मात् ऊर्ध्वं किमपि नास्ति, सर्वज्ञः, सकलमनोमतः, प्रशान्तः, त्रितापहर्ता, परमदयालः। तथाहि गीतम्—

"यस्मान्नास्ति भगवतो हि किञ्चिदूर्ध्वं सुप्राप्यश्च न खलु कस्यचिद्यतोऽन्यः।
सोऽसावेव परमहंसरामकृष्णः सर्वज्ञः सकलमनोगतः प्रशान्तः॥"[25] इति

**स्वामी रामकृष्णानन्दः —**

स्वामी रामकृष्णानन्दः परमहंसस्य रामकृष्णस्य साक्षात् शिष्य आसीत्। तस्य बाल्यनाम शशिभूषणचक्रवर्ती इति नाम आसीत्। शशिभूषणः १८६३ खीष्टाव्दस्य जुलाइ-मासस्य त्रयोदशदिनाङ्के जनिमलभत। स च हुगलीजिलायाः इच्छापुरग्रामे जन्म प्राप्तवान्। बाल्यकालादेव भगवति महती प्रीतिः आसीत्। आङ्गलशिक्षायै ग्रामं परित्यज्य कलिकाताम् आगतः। प्रथमतया ब्राह्मसमाजस्य सदस्य आसीत्। ततःपरं "Indian Miror" इति पत्रिकायां रामकृष्णविषये प्रबन्धमेकं पठित्वा तेषु अनुरागः आयातः। ततःपरं १८८३ खीष्टाव्दे दक्षिणेश्वरे श्रीरामकृष्णेन सह साक्षात्कारो जातः।

**कृतिः —**

स्वामी रामकृष्णानन्दः अत्यन्तं बुद्धिमान् आसीत्। स च कलिकातायां समागत्य उच्चशिक्षां समापितवान्। अद्वैतवेदान्तशास्त्रे, गीतादिशास्त्रे, उपनिषच्छास्त्रे अत्यन्तं व्युत्पन्नः आसीत्। संस्कृतभाषया विवेकानन्दस्य स्तुतिं लिलेख। तस्य च नाम श्रीविवेकानन्दपञ्चकम्।

**श्रीविवेकानन्दपञ्चकम् —**

स्वामी रामकृष्णानन्दः विवेकानन्दस्य प्रणाममन्त्रं लिलेख। स च श्लोकः जगति प्रसिद्धः वर्तते। तथाहि गीतम्—

"नमः श्रीयतिराजाय विवेकानन्दसूरये।
सच्चित्सुखस्वरूपाय स्वामिने तापहारिणे॥"[26]

आदौ विवेकानन्दस्य महिमानं वर्णयति। नित्यानित्यविषयेषु विवेकज्ञानी स्वामी। विवेकवैराग्यचित्तशुद्धचित्तः, विवेकदानैकविनोदशीलः, आनन्दमूर्तिस्वरूपः, नित्यानन्दस्वरूपः, विवेकानन्दः। एतादृशं जनम् अहं स्तौमि इति रामकृष्णान्दः। तथाहि गीतम्—

"तं देशिकेन्द्रं परमं पवित्रं विश्वस्य पालं मधुरं यतीन्द्रम्।
हिताय नृणां नरमूर्तिमन्तं विवेक आनन्दमहं नमामि॥"[27] इति

स्तोत्रेणानेन हिन्दुधर्मस्य पुनःप्रतिष्ठापकस्य गुरुवर्यस्य स्वामिनः वन्दना विधीयते। पुनश्च तस्य स्वभावः, तस्य चिन्तनम्, तस्य कर्म इत्येतान् विषयान् विलोक्य तस्य स्तुतिः विधीयते।

**समीक्षणम्** —

संस्कृतजगति विवेकानन्दस्य अवदानम् अतुलनीयम्। अद्वैतवेदान्तशास्त्रादिषु अत्यन्तं कुटिलतया जगन्मिथ्या ब्रह्म सत्यम् इति मतं प्रतिपादितम्। परन्तु स्वामी विवेकानन्दः तादृशं प्रौढग्रन्थम् अवगम्य अत्यन्तं सरलतया जनानां सकाशे प्रतिपादयामास। पुनश्च साक्षात् पङ्क्तिं पठित्वा अवगच्छन्ति चेत् तत् संस्कृतं संस्कृतमेव नास्ति इति संस्कृतज्ञानां राद्धान्तः। यथा- लौकिकं काव्यम् प्रायः तथा भवति। यथा - शिशुपालवधम्, किरातार्जुनीयम्, नैषधीयचरितम् इत्यादयः। परन्तु इदं मतं खण्डयामास विवेकानन्दः। अत्यन्तं सरलतया जगद्गुरोः रामकृष्णस्य स्तुतिः विहिता। स्तोत्रेषु एतेषु अर्थस्य प्राधान्यं दरीदृश्यते न तु शब्दस्य। स्वामिजी अद्वेततत्त्वम् अनुभूय तन्मार्गे स्वकीयं जीवनं नियुक्तवान्। अर्थात् स practical vedanta आचरितवान्। पुनश्च ऋग्वेदे यथा वागाम्भृणी आदित्यादिदेवतात्मना चराचरात्मकप्रपञ्चे भ्रमन्ती विद्यते। तस्य शक्त्या जगति सर्वे प्राणिनः श्वासप्रश्वासादिकार्यं कर्तुं पारयन्ति। तद्वत् आधुनिके युगे रामकृष्णः एव सर्वात्मना प्रपञ्चे भ्रमति। स एव शुभाशुभफलदायकः, कर्मफलदायकः, साक्षात् धर्मस्वरुपः। तस्मात् सर्वं परित्यज्य रामकृष्णं भज। तेन अस्माकं समेषां चित्तशुद्धिः भवेत्।

अभेदानन्दः संस्कृतजगति शङ्कराचार्यम् अनुसृतवान्। तस्य ग्रन्थे श्रीजयदेवः गीतगोविन्दे श्रीकृष्णस्य दशावतारं वर्णयति। मस्त्यकूर्मादिरूपेण श्रीकृष्णं चिन्तितवान्। इयमेव रीतिः अभेदानन्देन समाश्रिता। रामकृष्णमपि विविधावताररूपेण कल्पयामास अभेदानन्दः। परन्तु म्लेच्छावरताररूपेण रामकृष्णं नैव चिन्तितवान्। ततः अग्रेसरन् स खीष्टं महम्मदं शङ्करं चैतन्यं च अवताररूपेण वर्णयति। रामकृष्णः अपि स्वजीवने विविधधर्मस्य साधनां चकार। ततश्च सिद्धिलाभः कृतः।

बाल्मीकिकृतरामायणे चतुर्विंशतिसहस्रं श्लोकाः आसन्। गायत्रीमन्त्रे २४ अक्षराणि सन्ति। एवञ्च रामायणस्य प्रति एकसहस्रात्मकस्य श्लोकस्य प्रारम्भम् अक्षरम् भवति गायत्रीमन्त्रस्थम् एकैकम् अक्षरम्। इयञ्च रामायणस्य रीतिः। तामेव रीतिमनुसृत्य अभेदानन्दः श्रीश्रीरामकृष्णस्तवराजस्तोत्रं लिलेख। अपि च "ॐ नमो भगवते रामकृष्णाय" इति द्वादशाक्षरमन्त्रं परिकल्प्य तदनुरूपमस्य स्तवराजस्य रचना विहिता, एकेन एकेन अक्षरेण एकैकशः श्लोकः रचितः।

एते स्वामिनः अत्यन्तं सरलसंस्कृतभाषया अद्वैतवेदान्तस्य गूढार्थं प्रतिपादयामासुः। तत्र स्वामी ब्रह्मानन्दः चर्पटपञ्जरिकास्तोत्रस्थं भावं स्वकीयस्तोत्रे प्रतिपादितवान्। दिवारात्री चक्राकारे परिभ्रमतः वर्तेते। तथैव मनुष्याणां जीवने न किमपि स्थिरतया तिष्ठति। गच्छता कालेन माता पिता, पुत्रः, यौवनकालः, स्थावरजङ्गमम् सर्वं विनश्यति। तस्मात् सर्वं परित्यज्य भगवन्तं गोविन्दं भजतु। तथैव स्वामी ब्रह्मानन्दः अपि प्राह— सर्वं पार्थिवं परित्यज्य दीनबन्धोः शरणं गच्छतु इति।

**उपसंहृतिः —**

रामकृष्णपरम्परायां विद्यमानाः महाराजपादाः संस्कृतवाङ्मये बहुविधानि कार्याणि चक्रुः। तत्र रामकृष्णस्य साक्षात् शिष्यं विहाय तदुत्तरम् आगताः स्वामिपादाः अपि संस्कृते बहुविधानि कार्याणि चक्रुः। यथा— स्वामी हर्षानन्दः श्रीरामकृष्णसुप्रभातम्, श्रीरामकृष्णप्रणतिम्, श्रीशारदास्तुतिसप्तम्, श्रीविवेकानन्दप्रभातप्राञ्जलिञ्च प्रणीतवान्। पुनश्च स्वामी विरजानन्दः श्रीरामकृष्णस्तोत्रदशकम्, श्रीसारदादेवीस्तोत्रामृतमलिखत्। एते आजीवनं संस्कृतमातुः पादसेवां कुवर्न्तः संस्कृतसेवकान् वर्धयन्ति। पुनश्च सर्वजनबोधनाय अत्यन्तं सरलतया जगद्गुरोः रामकृष्णस्य, जगन्मातुः सारदादेव्याः, हिन्दुपथप्रदर्शकस्य विवेकानन्दवर्यस्य स्तुतिम् प्रणाममन्त्रान् लिलेख। संस्कृतवाङ्मये रामकृष्णपरम्परानुयोगिनां योगदानं तु अविस्मरणीयम्। पुनश्च केचन महाराजाः उपनिषद्ग्रन्थादिषु विद्यमानगूढार्थं संस्कृतेतरभाषया सुष्ठुतया प्रतिपादितम्। तथा— स्वामी जुष्टानन्दः, स्वामी भावाघनानन्दः, स्वामी तथागतानन्दः, स्वामी वीरेश्वरानन्दः, स्वामी भूतेशानन्दः, स्वामी रङ्गनाथानन्दः, स्वामी गम्भीरानन्दः प्रभृतयः। अद्यतनीयाः अपि केचन महाराजाः संस्कृतप्रचाराय निरन्तरं संस्थानेषु पाठयन्तः पुस्तकं रचयन्तः च संस्कृतमातुः सेवां विदधति। एवञ्च रामकृष्णस्य साक्षात् शिष्याणां संस्कृते अवदानमिति समुद्रवद्विशालविषयं समासेन यथामति मया प्रस्तुतमिति शिवम्।

**तथ्यसूत्रम्**

1.वाणी ओ रचना(६) – पृ. २६९।
2.स्तवनाञ्जलिः— पृ. ४७।
3.स्तवनाञ्जलिः— पृ. ४७।
4.स्तवनाञ्जलिः— पृ. १२३।
5.स्तवनाञ्जलिः— पृ. १२३।
6.स्तवनाञ्जलिः— पृ. १६३।
7.स्तवनाञ्जलिः—पृ. १६४।
8.स्तवनाञ्जलिः—पृ. १६५।
9.स्तवनाञ्जलिः—पृ. १६५।
10.स्तवनाञ्जलिः— पृ. १६५।
11.स्तवनाञ्जलिः— पृ. ७०।
12.स्तवनाञ्जलिः— पृ १७९।
13.स्तवनाञ्जलिः— पृ १९८।
14.स्तवनाञ्जलिः— पृ १८९।
15.स्तवानाञ्जलिः— पृ. १८७।
16.स्तवनाञ्जलिः— पृ २०३।

17.स्तवनाञ्जलिः— पृ २०३।
18.स्तवनाञ्जलिः— पृ. १६३।
19.स्तवनाञ्जलिः— पृ. १६६
20.स्तवनाञ्जलिः— पृ. १६९
21.स्तवनाञ्जलिः— पृ. १६३।
22.स्तवनाञ्जलिः— पृ. १७३।
23.स्तवनाञ्जलिः— पृ. १८९।
24.स्तवनाञ्जलिः— पृ. १८९।
25.स्तवनाञ्जलिः— पृ. १६९।
26.स्तवनाञ्जलिः— पृ. १९८।
27.स्तवनाञ्जलिः— पृ. १९९।

## Bibliography


- Svāmī vivekānanda 1964. vāṇī o racanā. Kalikātā : udbodhanakāryālayaḥ
- Stavanāñjali (mūlamātra). 1980. svāmī brahmasthānanda (prakāśaka). Nāgapur : rāmakṛṣṇamaṭh.
- saṃskṛtasāhitye paścimavaṅgasyāvadān. 2013. dāś nārāyaṇa. Kalikātā : kathābhāratī.
- śrīrāmakṛṣṇa-bhaktamālikā. 1384. svāmī gambhīrānanda. Kalikātā : udbodhanakāryālaya.
- vyāsadeva. muṇḍakopaniṣat (bhāvānuvādasahita). 2012. svāmī juṣṭānanda. Kalikātā : udbodhanakāryālaya
- vyāsadeva. Śrīmadbhagavadgītā (vaṅgānuvādasahitā). 2012. svāmī raṅganāthānanda. Kalikātā : udbodhanakāryālaya.
- stavakakusumāñjali. 2015. svāmī gambhīrānanda. Kalikātā : udbodhanakāryālaya.
- vyāsadeva. muṇḍakopaniṣat (bhāvānuvādasahita). 2012. svāmī bhūteśānanda. Kalikātā : udbodhanakāryālaya.
- bādarāyaṇa. brahmasūtram(vaṅgānuvādasahita). 2010. svāmī vīreśvarānanda. Kalikātā : udbodhanakāryālaya.
- mahābhāratakathā. 2012. svāmī tathagatānanda. Kalikātā : udbodhanakāryālaya.